# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## प्रवेशपरीक्षा - प्रथमपत्रिका

दिनाङ्कः- २६.०८.२०१८ | पूर्वाह्णः १०.००तः १.०० पर्यन्तम्

समयः- होरात्रयम् | अङ्काः - १००

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. अष्टानाम् एकवाक्येन उत्तरं लिखत। 8

१. " गङ्गावतरणम् " अस्य रचयिता कः ?

२. राजा तारापीडः चन्द्रापीडं किं कर्तुम् ऐच्छत् ?

३. नीलकण्ठदीक्षितः कस्य उपासकः आसीत् ?

४. अट्टहासनामा असिः कस्य हस्तात् अपहृतः ?

५. विसंज्ञे भीष्मे पतते सति के तं धारितवन्तः ?

६. अप्सरसः आक्रन्दनं कः शुश्राव ?

७. उत्तररामचरितस्य रचयिता कः ?

८. के. एल्. व्यासरायशास्त्रीमहोदयेन विरचितस्य ग्रन्थस्य नाम किम् ?

९. भीष्मपरशुरामयुद्धे कः पराजितः ?

१०. शङ्खचूडं कः ररक्ष ?

2. सप्तानां वाक्यद्वयेन उत्तरं लिखत। 14

१. दर्शनार्थमागतं चन्द्रापीडं शुकनासः किमाह ?

२. अप्सरसः कैः वचनैः राजानं रञ्जयामासुः ?

३. पञ्चमहाकाव्यानि कानि ? तेषु भारविविरचितं महाकाव्यं किम् ?

४. कुशः श्रीरामं प्रथमतः दृष्ट्वा किमचिन्तयत् ?

५. शङ्खचूडाय वासुकेः आज्ञा का ?

६. सिद्धः स्वचरणाम्भोजरजसा किं चकार ?

७. भैरवाचार्येण पुष्पभूतये कानि प्रहितानि ? केन च आनीतानि ?

८. परशुरामतपःप्रभावेण आगतानि सांग्रामिकोपकरणानि कथमासन् ?

3. त्रयाणां पञ्चषैः वाक्यैः संस्कृते उत्तरं लिखत। 9

१. शिशुकलहमाकर्ण्य के के समागताः ? ते कथंभूताः अभवन् ?

२. वने किं किं लभ्यं भवति ? किं च अलभ्यं भवति ?

३. उर्वशी कुतः विस्मृताविस्मृतात्मा तस्थौ ?

४. ' क्षम्यतां मम साहसम् ' इति भीष्मे वदति परशुरामः किमकरोत् ?

4. त्रयाणां ससन्दर्भं विवृणुत। 9

१. " न खलु अक्षिदुःखितो अभिमुखे दीपशिखां सहते।"

२. " देवावमाननं महासत्वता इति मन्यन्ते।"

३. " हृदयं त्वेव जानाति प्रीतियोगं परस्परम्।"

४. " न निकर्षचिकीर्षया कृतम् ।"

५. " भद्रे ! क्वासि? किमर्थं वा दर्शनपथमागतासि। "

5. एकस्य पद्यस्य सान्वयमर्थं लिखत। 4

१. स्पृहणीयगुणैर्महात्मभिः चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥

२. वासोयुगमिदं रक्तं प्राप्ते काले समागतम्।
करोति महतीं प्रीतिं परार्थं देहमुज्झतः॥

6. श्लोकद्वयं पूरयत । 6

१. कर्मस्वात्मोचितेषु---------------------- देहि मह्यम्॥

२. पापौघं -------------------------------- देहि मह्यम्॥

३. सहसा -------------------------------------संपदः॥

7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत। 4

१. श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिनः २. लक्ष्मणसूरिः

8. चतुर्णां रूपाणि परिचाययत। 4

१. दिक्षु २. ध्वनिना ३. अरमत

४. विदार्य ५. दुकूलधारी ६. मनांसि

9. चत्वारि पदानि संस्कृतवाक्येषु योजयत। 4

१. भवता २. द्विरदः ३. मस्करी

४. उपश्रुत्य ५. त्रातुम् ६. प्रत्युज्जगाम

10. चतुर्णां पर्यायपदं लिखत । 4

१. अन्तर्वत्नी २. आशीविषः ३. आगः

४. प्रतीक्ष्यः ५. रयः ६. हरिदश्वः

11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत। 4

१. चिरादनुजग्राह २. पुरस्तिरोदधे ३. नांशुमता

४. जनयन्त्यचिराय ५. तथेतरे ६. दिनैर्विवृद्धिम्

12. चतुर्णाम् एकपदं लिखत । 4

१. मर्म जानातीति २. करुणारहितः ३. विनयप्रमाथी

४. गुरूपदेशं विना जानति ५. अपवादवचनम् ६. तरुणतृणविशिष्टदेशः

13. चतुर्णां व्याकरणविशेषं लिखत । 8

१. आदायचरः २. सन्तमसम् ३. भवन्तमुपतिष्ठे

४. दार्षदः ५. तस्मै नमः ६. विनयन्ते

14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत। 8

१. मदमानसमुद्धतम् २. आत्मसिद्धये ३. सत्यधर्मौ

४. गौरवादरयोः ५. जितजिष्णुः ६. पौरुषाभिमानी

15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत। 6

१. अमन्यत २. वर्तेत ३. रञ्जयामास

४. उत्पपात ५. वर्धताम् ६. कुरुते

16. चतुर्णां रिक्तस्थानानि पूरयत। 4

१. प्रभाकरवर्धनस्य पत्नी ----------- आसीत् ।

२. खगाधिपस्य हृदयं ----------- मन्ये कृतम्।

३. प्रियानाशे कृत्स्नं किल --------- हि भवति।

४. कदाचित् प्रमादोऽपि ------------- कल्पते।

५. पुरुषोत्तम इति भणितव्ये ----- इत्यभाणीत्।

---

श्रीसुरसरस्वतीसभा, शृङ्गेरी

प्रवेशपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २६.०८.२०१८ | अपराह्णः १.३०तः ३.००पर्यन्तम्

समयः - सार्धैकहोरा | अङ्काः ५०

सूचना - सर्वाणि उत्तराणि संस्कृते एव भवेयुः

1. विषयद्वयं विवृणुत। 10

 १. प्रेरणार्थकधातुरूपाणि कानि ? सोदाहरणं विवृणुत।

 २. प्रयोगाः कति ? सोदाहरणं विवृणुत ।

 ३. तत्पुरुषसमासं सोदाहरणं सलक्षणं विवृणुत।

2. विषयद्वयं विवृणुत। 8

 १. कृदन्ताव्ययानि कानि ? सोदाहरणं विवृणुत।

 २. सोदाहरणं विवृणुत - अपह्नुत्यलङ्कारः।

 ३. " तं जना भजत कौस्तुभप्रभम् " – सप्रस्तारम् सलक्षणं च अत्र विद्यमानं छन्दः विवृणुत।

3. त्रयाणां रूपाणि पुरुषवचनत्रये लिखत। 9

| | | |
|---|---|---|
| १. कुरुते | २. दास्यति | ३. जुहोति |
| ४. ऊचे | ५. ब्रूयात् | ६. अतनोत् |

4. चतुर्णाम् अन्यलिङ्गरूपाणि लिखत। 4

| | | |
|---|---|---|
| १. भुक्तवान् | २. गतवान् | ३. नयमाना |
| ४. कारकः | ५. वक्तृ | ६. पाचकम् |

5. द्वयोः प्रयोगं व्यत्यस्यत। 3

| | |
|---|---|
| १. मया गुरुपदेशः श्रूयते । | ३. देवासुराः क्षीरनिधिं मश्नन्ति। |
| २. वामनः बलिं वसुधां याचते। | ४. गुरुणा माणवकः धर्मम् उच्यते। |

6. त्रयाणां विग्रहवाक्यं कृत्वा समासनाम लिखत। 6

१. मध्येगङ्गम्　　२. सप्तर्षयः　　३. घनश्यामः

४. कृष्णसर्पः　　५. वृकोदरः　　६. अक्षप्रियः

7. मातृभाषया अनुवदत । 5

१. पुत्राः ! यूयं सदा परेषां हितमेव कुरुत।

२. छात्राः भक्त्या आचार्यं प्रणम्य ततः अध्ययनं प्रवर्तन्ते।

३. आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्।

४. धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः कौरवाः पाण्डवाः च किमकुर्वत ?

५. भक्तैः भगवान् वरान् याच्यते।

8. संस्कृतभाषायाम् अनुवदत । 5

1. ಹಿರಿಯರ ಆಜ್ಞೆಯು ಸದಾ ಪಾಲಿಸಲ್ಪಡತಕ್ಕದ್ದು.

   The orders of the elders should always be obeyed.

2. ವಿದ್ವಾಂಸರು ತಮ್ಮ ಉಪದೇಶದಿಂದ ಜನರ ಸಂಶಯಗಳನ್ನು ಛೇದಿಸುತ್ತಾರೆ.

   Scholars clear the doubts of the people by their advice.

3. ನಾನು ಅನ್ನವನ್ನು ಬೇಯುಸಲು ಬಯಸುತ್ತೇನೆ.

   I wish to cook rice.

4. ಗೋಪಿಯರು ಶ್ರೀಕೃಷ್ಣನ ನಾಮವನ್ನು ಹಾಡುತ್ತಾ ಮೊಸರನ್ನು ಕಡೆಯುತ್ತಾರೆ.

   Gopikas churn the curds by singing krishna's name.

5. ಸಾಧುಗಳು ತಮ್ಮ ದೃಷ್ಟಿಯಿಂದ ಪಾಪಿಗಳನ್ನು ಪವಿತ್ರಗೊಳಿಸುತ್ತಾರೆ.

   Just by their sight, the Sadhus purify the sinners.

--------